# ईशाद्यष्टोत्तरशतोपनिषदः

राष्ट्रियसंस्कृतसंस्थानम्
56-57 इन्स्टीट्यूशनल क्षेत्र, जनकपुरी
नई दिल्ली-110058

# ईशाद्यष्टोत्तरशतोनिषदः

## आद्यन्ततत्तच्छान्तियुजः

पाठान्तरटिप्पणीयुतः

समुच्चयोऽयं

पणशीकरोपाह्व-विद्वद्वरलक्ष्मणशर्मतनुजनुषा

श्रीवासुदेवशर्मणा

संस्कृतः

**राष्ट्रियसंस्कृतसंस्थानम्**

**मानितविश्वविद्यालयः**

56-57 इन्स्टीट्यूशनल क्षेत्र, जनकपुरी

नई दिल्ली-110058

# भूमिका ।

इह खलु संसारचक्रेऽतिकरालवदनान्धकारसंज्ञकाजगररूपेऽतिभयंकरे परिवर्तमानानां निजनिजार्जितानुगुणमनुगतत्रिविधतापतप्तानामैकान्तिकात्यन्तिकदुःखनिवृत्तिसाधनतया चतुर्विधपुरुषार्थान्यतमपुरुषार्थोपायमभिवाञ्छतां प्रेक्षावतां धीमतां पुरुषार्थान्वेषणा तावदादौ भवतीति निर्विवादमेव । अत्र स्वर्गापवर्गमात्रे नैसर्गिकमोहान्धकारविलुप्तालोकस्य लोकस्य शास्त्रमेव प्रकाशस्तदेव च दिव्यं चक्षुरस्मदादेरिति तदेवाधिगन्तव्यम् । तच्च कर्मब्रह्मोपासनात्मकम् । तत्प्रतिपादका वेदाश्च सन्ति स्वतःप्रमाणभूताः । तत्र वेदवाक्यानां उदिते जुहोति अनुदिते जुहोतीत्यादि प्रायः परस्परविरुद्धार्थाभिधायकत्वेन व्यवस्थितवेदवाक्यार्थानवधारणात्तद्व्यवस्थायै वेदवाक्यार्थविचारात्मिकां पूर्वमीमांसां सुगृहीतनामधेयो जैमिनिः सूत्रयांबभूव । तया च साक्षाद्विध्येकवाक्यतया सर्वेषां वेदवचसां कर्मपरत्वं प्रत्यपीपदत् । तदेव च यथावदाराधितं धर्मार्थकामरूपत्रिविधपुरुषार्थवितरणक्षममिति निगमागमराद्धान्तः ।

आचार्यास्तु सर्वासां श्रुतिप्रमाणानां ब्रह्मणि समन्वयं कृत्वा सर्वमिदमद्वितीयं ब्रह्म पारमार्थिकं भेददृष्टिश्चाविद्योपादाना तन्नाशश्चाद्वितीयात्मज्ञानेन ततश्चैकान्तिकात्यन्तदुःखनिवृत्तिश्चतुर्थपुरुषार्थावाप्तिर्भवति । अयमेव पुरुषार्थो मोक्षाख्यश्चतुर्ष्वन्तिमत्वेन गृहीतोऽप्यभ्यर्हितत्वाच्छ्रेष्ठ उपनिषज्ज्ञानैकसाध्यश्च । निश्श्रेयससाधनात्मैक्यप्रतिपत्तिहेतुतयैव ह्युपनिषदो रहस्यपदेनाभिलपन्ति वेदान्तविज्ञानचणाः ।

# उपनिषदामनुक्रमणिका ।


| विषयः | पृष्ठं. | विषयः | पृष्ठं. |
|---|---|---|---|
| १ ईशावास्योपनिषत् ... | १ | २८ नृसिंहपूर्वतापिन्युपनिषत् | १८५ |
| २ केनोपनिषत्... ... | २ | २९ नृसिंहोत्तरतापिन्युपनिषत् | १९२ |
| ३ कठोपनिषत्... ... | ४ | ३० कालाग्निरुद्रोपनिषत् ... | २०० |
| ४ प्रश्नोपनिषत्... ... | १० | ३१ मैत्रेय्युपनिषत् ... | २०१ |
| ५ मुण्डकोपनिषत् ... | १४ | ३२ सुबालोपनिषत् ... | २०५ |
| ६ माण्डूक्योपनिषत् ... | १८ | ३३ क्षुरिकोपनिषत् ... | २१२ |
| ७ तैत्तिरीयोपनिषत् ... | १९ | ३४ यन्त्रिकोपनिषत् ... | २१४ |
| ८ ऐतरेयोपनिषत् ... | २८ | ३५ सर्वसारोपनिषत् ... | २१५ |
| ९ छान्दोग्योपनिषत् ... | ३१ | ३६ निरालम्बोपनिषत् ... | २१७ |
| १० बृहदारण्यकोपनिषत्... | ७५ | ३७ शुकरहस्योपनिषत् ... | २१९ |
| ११ श्वेताश्वतरोपनिषत् ... | १२१ | ३८ वज्रसूचिकोपनिषत् ... | २२२ |
| १२ ब्रह्मबिन्दूपनिषत् ... | १२७ | ३९ तेजोबिन्दूपनिषत् ... | २२३ |
| १३ कैवल्योपनिषत् ... | १२८ | ४० नादबिन्दूपनिषत् ... | २४२ |
| १४ जाबालोपनिषत् ... | १३० | ४१ ध्यानबिन्दूपनिषत् ... | २४४ |
| १५ हंसोपनिषत्... ... | १३१ | ४२ ब्रह्मविद्योपनिषत् ... | २५० |
| १६ आरुणिकोपनिषत् ... | १३२ | ४३ योगतत्त्वोपनिषत् ... | २५४ |
| १७ गर्भोपनिषत्... ... | १३४ | ४४ आत्मबोधोपनिषत् ... | २६० |
| १८ नारायणोपनिषत् ... | १३५ | ४५ नारदपरिव्राजकोपनिषत् | २६५ |
| १९ नारायणोपनिषत् ... | १३६ | ४६ त्रिशिखिब्राह्मणोपनिषत् | २८१ |
| २० परमहंसोपनिषत् ... | १५० | ४७ सीतोपनिषत्... ... | २८९ |
| २१ ब्रह्मोपनिषत्... ... | १५१ | ४८ योगचूडामण्युपनिषत् ... | २९१ |
| २२ अमृतनादोपनिषत् ... | १५२ | ४९ निर्वाणोपनिषत् ... | २९७ |
| २३ अथर्वशिरउपनिषत् ... | १५४ | ५० मण्डलब्राह्मणोपनिषत् | २९८ |
| २४ अथर्वशिखोपनिषत् ... | १५८ | ५१ दक्षिणामूर्त्युपनिषत् ... | ३०३ |
| २५ मैत्रायण्युपनिषत् ... | १५९ | ५२ शरभोपनिषत् ... | ३०५ |
| २६ कौषीतकिब्राह्मणोपनिषत् | १६५ | ५३ स्कन्दोपनिषत् ... | ३०७ |
| २७ बृहज्जाबालोपनिषत्... | १७६ | ५४ त्रिपाद्विभूतिमहानारायणो. | ३०८ |

श्रोत्रेण ध्यायन्तो मनसैवमिति प्रविवेश ह चक्षुः ॥ ९ ॥ श्रोत्रꣳहोच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्योवाच कथमशकतर्ते मज्जीवितुमिति यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः ॥ ११ ॥ अथ ह प्राण उच्चिक्रमिषन्स यथासुहयः पड्वीशशङ्कून्संखिदेदेवमितरान्प्राणान्समखिदत्तꣳ हाभिसमेत्योचुर्भगवन्नेधि त्वं नः श्रेष्ठोऽसि मोत्क्रमीरिति ॥ १२ ॥ अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीत्यथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठासीति ॥ १३ ॥ अथ हैनं श्रोत्रमुवाच यदहꣳ संपदस्मि त्वं तत्संपदसीत्यथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति ॥ १४ ॥ न वै वाचो न चक्षूꣳषि न श्रोत्राणि न मनाꣳसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवन्ति ॥ १५ ॥ इति प्रथमः खण्डः ॥ १ ॥

स होवाच किं मेऽन्नं भविष्यतीति यत्किंचिदिदमा श्वभ्य आ शकुनिभ्य इति होचुस्तद्वा एतदनस्यान्नमनो ह वै नाम प्रत्यक्षं न ह वा एवंविदि किंचनानन्नं भवतीति ॥ १ ॥ स होवाच किं मे वासो भविष्यतीत्याप इति होचुस्तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो ह भवति ॥ २ ॥ तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवाच यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज्जायेरन्नेवास्मिञ्छाखाः प्ररोहेयुः पलाशानीति ॥ ३ ॥ अथ यदि महज्जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् ॥ ४ ॥ वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत्प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत्संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेदायतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् ॥ ५ ॥ अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपत्यमो नामास्यमा हि ते सर्वमिदꣳ स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ राज्यमाधिपत्यं गमयत्वहमेवेदꣳ सर्वमसानीति ॥ ६ ॥ अथ खल्वेतयर्चा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य भोजनमित्याचामति श्रेष्ठꣳ सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं पिबति ॥ ७ ॥ निर्णिज्य कꣳसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत्स-